# नवग्रह स्तोत्रं

आदित्याय च सोमाय मंगळाय बुधाय च
गुरु शुक्र शनिभ्यश्च राहवे केतवे नमः

1. जपा कुसुम संकाशं काश्यपेयं महाद्युतिं
तमोघ्नं सर्व पापघ्नं प्रणतोस्मि दिवाकरं

2. दधि शंख तुषाराभं क्षीरोदार्णव सन्निभं
नमामि शशिनं सोमं शंभोर्मकुट भूषणं

3. धरणी गर्भ संभूतं विद्युत्कांति समप्रभं
कुमारं शक्तिहस्तं च मंगळं प्रणमाम्यहं

4. प्रियंगु कळिका श्यामं रूपेणा प्रतिमं बुधं
सौम्यं सौम्य गुणोपेतं तं बुधं प्रणमाम्यहं

5. देवानां च ऋषीनां च गुरुं कांचन सन्निभं
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिं

6. हिमकुंद मृणाळाभं दैत्यानां परमं गुरुं
सर्व शास्त्र प्रवक्तारं भार्गवं प्रणमाम्यहं

7. नीलांजन समाभासं रविपुत्रं यमाग्रजं
छाया मार्तांड संभूतं तं नमामि शनैश्चरं

8. अर्धकायं महावीरं चंद्रादित्य विमर्दनं
सिंहिका गर्भ संभूतं तं राहुं प्रणमाम्यहं

9. पलाश पुष्प संकाशं तारकाग्रह मस्तकं
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहं

आदित्यादि नवग्रह देवताभ्यो नमोनमः